Preface

।। जयश्रीस्वामिनारायण ।।

श्रीहरिवाक्यसुधासिन्धौ उपनिषदां प्रभावः

# पुरोवाक्

श्रीहरिणा स्वामिनारायणेन प्रवर्तितस्य उद्धवसम्प्रदायस्य प्रसारस्थली गुर्जरप्रदेश इति समेषां श्रीहरिभक्तिपरायणानां जनानां मनीषा । अस्मिन् प्रदेशे बाला अपि "जय स्वामिनारायण" इति शब्देन सन्ति सम्यक् परिचिताः । प्रदेशस्यास्य प्रतिगृहं विराजते भगवतः स्वामिनारायणस्य प्रतिमेति कथनमपि सत्यान्नापैति । नूनं कृत्स्नो हि गुर्जरप्रदेशः स्वामिनारायणमयः ।

आबाल्यादयमपि जनः भगवतः सर्वावतारिणः, सकलसंसारैककारणस्य, विश्वविद्योतितवैभवस्य, तमसः पारेकृतनिकेतनस्य, सर्वेश्वरस्य, सकलकल्याणगुण-शेवधेरखिलहेयप्रत्यनीकस्य, समकालमेवाचार्यत्त्वभगवत्त्वर्योनिर्वाहकस्य, दीनजनोद्धरणै-कव्रतस्य, स्वामिनारायणस्य भूम्ना महिम्ना परिचितः तस्यैवादभ्रयादयया परिपोषितः संस्कृताध्यनारम्भणसमकालमेव मनसि निश्चयं चकार सम्प्रदायेऽस्मिन् साहित्यिकं कार्यं नूनं करिष्यामि समागते समुचिते काल इति ।

यस्य प्रसादकलया बधिरः श्रृणोति पङ्गुः प्रधावति जवेन च वक्ति मूकः, अन्धः प्रपश्यति भुवि लभते च कामान् तस्यैव देवस्य कृपाकटाक्षात्, त्रय्यन्तविद्यां प्रथितां जगत्याम्, मनोमहामोहविनाशयित्री जाड्यादिदोषापहारदक्षामध्येतुकामो जन एष जातः । लब्ध्वागुरुञ्ज्ञानप्रकाशकान् स्वान् सारस्वतान् तत्त्वविचारदक्षान् सौभाग्यवैपुल्यममन्यतस्वम् ।

विशिष्टाद्वैतराद्धान्तनिर्धारणविचक्षणानामाचार्याणां तेषां तेषां सविधे समधिगत्य शास्त्रविचारपदवीविवेकलव एष जनोऽपि समागते काले एम. एस. विश्वविद्यालयस्थस्य वटोदरसंस्कृतमहाविद्यालयस्य विशिष्टाद्वैतवेदान्ते आचार्यपरीक्षां विशिष्टया योग्यतया सह समुदतरत् ।

पुनर्मनसि समभवत् विद्यावाचस्पतेरूपाधये प्रबन्धं निर्मातुम् । तदात्वे यद्यपि नैके विषयाः स्फुरिता अभूवन् मनसि परन्तु क्वापि मनःस्थैर्यं न लब्धम् मया । अन्ते भवभयाभितप्तजनभागधेयभावितावतरणानामाश्रितजनवात्सल्यैकजलधीनां,ममात्मोज्जीवनकर्तॄणां, सततं तपश्चरणेनाधिगतान्तःकरणनैर्मल्यानां,ममाचार्यवर्याणां, निरन्तरंतत्त्व-हितपुमर्थोपदेशपरायणानां तत्र श्रीमतां परमपूज्यानां सद्गुरूणां शास्त्रिवर्याणां घनश्यामप्रकाशदासानामनुमतिरपि समुपलब्धा कार्यमेतत् कर्तुम् । तेषामाशीर्वचसां मार्गदर्शनेनैव मनसि समभवत् "हरिवाक्यसुधासिन्धु"मेवाश्रित्य कार्यं कर्तुं गवेषणायाः ।

ग्रन्थोऽयम् मम बाल्यकालादेवातिप्रिय आसीत् । ग्रन्थस्यास्य सूक्तयः मम चेत आकर्षयन्ति दर्शं दर्शम् । तत्र तत्र स्वप्रवचनपीयूषप्रवाहे

---

संसाराग्निविदीपनव्यपगतप्राणात्मनां संसारिणाभकृतविद्यानामपि जीवानामुद्धरणैकव्रतिनो भगवतः स्वामिनारायणस्य सूक्तिसुधासंचेतमात्रेणैव मोमोदतेऽन्तरंगम् ।

ग्रन्थस्यास्यैतद् वर्तते वैशिष्ट्यं यत् – क्वापि कल्पनायाः प्राधान्यं नास्ति। सर्वासां सूक्तीनां समर्थनं भवति वेदान्तोक्तिभिः । अस्य ग्रन्थस्यालोके निर्भ्रान्ततया वक्तुं शक्यते यत्सिद्धान्तोऽयं पूर्णरूपेण वैदिकोऽस्तीति ।

अस्मिन् गवेषणा कार्ये मम सर्वविधं साहाय्यमाचरन्तः वेदान्तशास्त्रस्याप्रतिमविद्वांसः, लेखका नैकेषां वेदान्तग्रन्थानां तत्र श्रीमन्तः डॉ. शिवप्रसादद्विवेदी महाभागाः (निवृत्तप्राचार्याः - श्रीहनुमत्संस्कृतमहाविद्यालयस्यायोध्यकस्य) मम नैकविधमविस्मरणीयं साहाय्यमकार्षुरिति तेषां कृतज्ञतां शिरोभिर्वहामि । पुनः मम सौभाग्यभूम्नामहिम्ना गवेषणाया अस्याः निर्देशकत्वेन समुपलब्धाऽभूवन् उपर्युक्तस्य संस्कृतमहाविद्यालयस्य प्राध्यापकाः स्वनामधन्याः प्राच्यप्रतीच्योभय-विद्याविद्योतितान्तःकरणाः तत्र श्रीमन्तः श्रीरामपालशुक्ल महाभागाः । तेषामेव निर्देशने मया कृतमिदं "हरिवाक्यसुधासिन्धौ उपनिषदां प्रभावः" नामधेयं गवेषणाकार्यम् ।

यद्यपि कार्यमिदं मया स्वशक्त्यनुसारेण सम्पादितं समीचीनतया, परञ्च गच्छतः स्खलनं क्वापीतिरीत्या क्वचन्नैयून्यं चेल्लभ्येत तत्तु सुधियः समीकरिष्यन्तीति द्रढीयान् मदीयो विस्रम्भ इत्यलमतिपल्लवितेन ।

उत्प्रेक्ष्योत्प्रेक्ष्य बुद्ध्या कथमपि न गुणग्रामहारो मयास्मिन्,
सन्दर्भे गुम्फितो यः प्रभवति भगवत्तोषणे कोऽप्यमूल्यः ।
किन्तु प्राचां प्रबन्धादनवधिसहजानन्ददिव्यानुभाव,
प्रोत्कृष्टैश्वर्यकोशात्किमपि करगतं रत्नमुत्कीर्णमत्र ।।
स्यादेव वाक्यरचनादोषो मे मतिमान्द्यतः ।
गुणदोषविभागेषु सन्तस्तुष्यन्ति पूर्वतः ।।

उचितमनुचितं वा यन्ममेदं वचः स्यात्, मम हृदयसखो यस्तस्य तु प्रीणनं स्यात्।
विबुधवलयचित्ताह्लादने के वयं स्मः, स हि भवति समर्थो यः पुमान्वश्यभाक् स्यात्।।

-विदुषां वशंवदः
शा. ज्ञानवल्लभदासः